# अभिज्ञानशाकुन्तलम्- 6, 7 अङ्कौ

## षष्ठोऽ ङ्कः

पञ्चमाङ्के भवद्भिः पठितं यद् दुष्यन्तेन शकुन्तलाया अङ्गुरीयकं प्राप्तम्, तेन सूचितं यद् दुष्यन्तेन शकुन्तला स्मृता। षष्ठाङ्के प्रधानरूपेण दुष्यन्तस्य शकुन्तलाविरहो वर्णितः। अतोऽ त्र मुख्यो रसो विप्रलम्भशृङ्गारो वर्तते, मध्ये यदा अनपत्यस्य धनवृद्धिनामकस्य वणिजः प्रसङ्ग आयाति तदा करुणो व्यज्यते, किन्तु अङ्कस्य अन्ते वीरो ध्वनितः, यत्र मातलिना विदूषकः ताड्यते, राजा अदृश्यं मतालिं हन्तुं बाणं संधित्सति च। अस्य अङ्कस्य प्रारम्भे शकुन्तलाया मात्रा मेनकया दुष्यन्तस्य वार्तां ज्ञातुं प्रेषिता मिश्रकेशी अप्सरस्तीर्थे स्नात्वा राज्ञो दुष्यन्तस्य प्रमदवने प्रविशति। सा चिन्तयति यत् शकुन्तला मम सख्या मेनकायाः पुत्री वर्तते। अतः शकुन्तला ममापि शरीरभूता (पुत्री) वर्तते। ततो मिश्रकेशी प्रमदवनं प्रविश्य तिरस्करिण्या विद्यया तिरोहिता भवति, राज्ञो वृत्तान्तं ज्ञातुं तिष्ठति च। वर्तते वसन्तसमयः। तदानीम् एव मधुरिका परभृतिका च चेट्यौ प्रविशतः। परभृतिका आम्रमञ्जरीं गृहीत्वा कामदेवाय अर्पयति, कामदेवं तया पूजयति। तदानीं कञ्चुकी प्रविश्य सूचयति यद् आम्रमञ्जर्या भङ्गो न कार्यः, प्रतापिना राज्ञा वसन्तोत्सवो निषिद्धः, तस्यादेशं जडा अपि पालयन्ति। तदा चेट्या कथ्यते यन्मया न ज्ञातम्। चेटीभ्यां वसन्तोत्सवनिषेधस्य कारणं पृच्छ्यते। कञ्चुकिना तस्य कारणं कथ्यते यद् राजा शकुन्तलाविरहेण व्याकुलो वर्तते, अत एव तेन वसन्तस्योत्सवो निषिद्धः।

1. उत्सवप्रियाः खलु राजानो भवन्ति।

वसन्तोत्सव-निषेधस्य कारणम् अजानती मिश्रकेशी कथयति- राजानो निश्चयेन उत्सवप्रिया भवन्ति। राज्ञा कृतस्य वसन्तोत्सव-निषेधस्य किमपि महत् कारणं भवेत्। पश्चात् चेटीभ्यां सह संवादे कञ्चुकिवचनाद् मिश्रकेशी जानाति यद् अस्योत्सवस्य निषेधस्य कारणं राज्ञो दुष्यन्तस्य शकुन्तलाविरहो वर्तते। राज्ञो हि रमणीयात् पदार्थाद् द्वेषो वर्तते, रात्रौ निद्रां न लभते, प्रजाभ्यो दर्शनं न ददाति, राज्ञीभिः सह भाषणे तस्य गोत्रस्खलनं भवति च।

2. अहो सर्वासु अवस्थासु रामणीयकम् आकृतिविशेषाणाम्।

यदा राजा विदूषकेण सह प्रमदवने आगच्छति तदा कञ्चुकी राजानं दुष्यन्तं विलोक्य कथयति यद् अयं महाराजो यद्यपि शकुन्तलाविरहेण अतिदुःखितो वर्तते, तथापि दर्शनेऽ यं रमणीय एवास्ति। एतादृशानां महापुरुषाणाम् आकारो विशेषो भवति। अत एव ते महापुरुषाः, सुखावस्था भवतु दुःखावस्था वा भवतु, सदा रमणीयाः (सुन्दरा) एव भवन्ति। इदम् आश्चर्यकारि भवति। अत्र दुष्यन्ते माधुर्यनामको गुणः प्रतिपादितः। उद्वेगस्य कारणे सत्यपि उद्वेगस्य अभावो माधुर्यं कथ्यते- संक्षोभेष्वप्यनुद्वेगो माधुर्यं

परिकीर्तितम्। एवं राजनि विद्यमानम् अपि शकुन्तलाविरहेण जायमानं दुःखं कञ्चुकिना न लक्षितम्। अतो राजनि गाम्भीर्यं प्रतीयते।

3. संस्कारोल्लिखितो महामणिरिव क्षीणोऽ पि नालक्ष्यते।

इह कञ्चुकी विरहेण दुःखितस्यापि दुष्यन्तस्य रमणीयतां तेजस्वितां च वर्णयति। स कथयति यद् अनेन महाराजेन हारकुण्डलादीनाम् अलंकारविशेषाणां धारणं त्यक्तम्, अयं वामे प्रकोष्ठे केवलम् एकमेव शिथिलं कङ्कणं धारयति, कृशो वर्तते, अस्य अधरो दीर्घश्वासैः शुष्को भवति, अयं चिन्तया रात्रौ अपि निद्रां न लभते, अस्य नेत्रे अतीव रक्ते स्तः। तथापि कृशः सन्नपि तेजसा (पराक्रमेण) कृशो न ज्ञायते। यथा महामणिः संस्काराय (मलस्य अपनयनाय) शाणेन उल्लिखितः (घर्षणेन कृशः) सन्नपि स्वप्रकाशेन कृशो न लक्ष्यते। महाराजो विरहदशायाम् अपि तेजसा हीनो नास्ति, रमणीय एव प्रतिभाति। शाणे (निकषे) तनूकृतेन तेजस्विना महामणिना दुष्यन्तस्य उपमया उपमाऽ लंकारो विद्यते।

4. भूयोऽ पि लङ्घित एष शकुन्तलाव्याधिना।

अत्र विदूषकः शकुन्तलां विचिन्त्य प्रलपन्तं दुष्यन्तम् अभिलक्ष्य वदति। दुष्यन्तो वदति यद् यदा सा सारङ्गाक्षी शकुन्तला मम पार्श्वे समागता तदा मम हतं हृदयं सुप्तम् आसीत् (शकुन्तलां न अस्मरत्), यद्यपि तया बहु प्रबोधितम्, किन्तु इदानीं पश्चात्तापाय एव शकुन्तलां स्मरति। इदं श्रुत्वा विदूषको वदति यदयं दुष्यन्तः पुनः शकुन्तलारूपेण वातव्याधिना ग्रस्तो जातः। वातव्याधिना पीडितो यथा असंबद्धं वदति तथा अयमपि। अस्य वातव्याधेर्नाम शकुन्तला वर्तते। न जाने, कदा केन वाऽ स्य शकुन्तलानाम्नो वातव्याधेः चिकित्सा भविष्यति। एवं वदन् विदूषको मनसा उपहसति चिन्तितो भवति च।

5. यद् उच्यते रन्ध्रोपपातिनोऽ नर्था इति तदव्यभिचारि।

इह राजा विदूषकं प्रति वदति- लोके प्रसिद्धं वर्तते यद् अनर्थाः (उपद्रवा विपत्तयः) रन्ध्रेण (छिद्रेण) उपपातिनः (पतनशीला) भवन्ति। यदैको दोषो विपत्तिर्वा भवति तदा तेन दोषेण तया विपत्त्या वा नाना दोषा विपत्तयो वा समायान्ति। इदं कथनम् अव्यभिचारि ( व्यापकं सत्यं वा) वर्तते। मम मनो यदैव शकुन्तलास्मृतेः अवरोधकेन अज्ञानेन मुक्तम्, तदानीम् एव कामदेवो मां हन्तुं स्वधनुषि चूतशरं निवेशितवान्। शकुन्तलास्मृतिरूपेण रन्ध्रेण कामप्रहारोऽ पि आगतः। एवं वसन्तमासोऽ पि मां हन्तुं शीघ्रम् आयातः। एका विपद् अन्यासामपि विपदां द्वारं भवति। सा एकाकिनी नायाति, अपितु साङ्गा सपरिवारा च।

6. अत एव महीपतिभिः सहृदयाः सहाया न विरहितव्याः।

इदं मिश्रकेश्या तदा कथ्यते यदा राजा विदूषकं प्रति कथयति यद् इदानीम् अहं शकुन्तलायाः सर्वं वृत्तान्तं स्मरामि, त्वं शकुन्तलायाः त्यागस्य समये मम समीपे नाऽऽ सीः। मिश्रकेशी कथयति यद् ये महीपतीनां (राज्ञां) सहृदयाः ( सुखेन सुखिता दुःखेन दुःखिताश्च हितैषिणः) सहायाः (सहायकाः) पुरुषा भवन्ति ते महीपतिभिः सदैव स्वसमीपे स्थापनीयाः, न स्वतो दूरीकरणीयाः। राजा दुष्यन्तो यदा शकुन्तलायाः परित्यागस्य समये विदूषकं स्वसमीपेऽ करिष्यत् तदा स विदूषकः शकुन्तलाया विषयेऽ स्मारयिष्यत्, शकुन्तलायाः त्यागो नाऽ भविष्यच्च। किन्तु राज्ञा दुष्यन्तेन विदूषकः स्वसमीपे न कृतः, तस्माद् एवाऽ यं दारुणो वियोगरूपः परिणामो जातः।

7. भवितव्यता खल्वत्र बलवती।

इयं राजानं प्रति विदूषकस्य उक्तिः। विदूषको वदति यद् भवान् पूर्वं मां शकुन्तलाया विषये सर्वम् उक्तवान्, किन्तु माम् अन्ते 'सखे, शकुन्तलानाम्नी काचिदपि नास्ति, परिहासो मया कृतः' इति कथयित्वा वञ्चितवान्। तदानीं तवेयं वञ्चना मया न ज्ञाता। मम बुद्धिः मृत्पिण्डवत् स्थूला वर्तते। अहं मूर्खोऽ स्मि, तव रहस्यं न ज्ञातवान्। यदि शकुन्तलाविषये मम यथार्थं ज्ञानम् अभविष्यत् तदा तव शकुन्तलाया वियोगो नाऽ भविष्यत्। किन्तु मया तथा न ज्ञातम्। मन्ये शकुन्तलाया वियोगो विधिना पूर्वमेव निश्चितः। यद् भावि तद् भवत्येव। भवितव्यता (भाग्यं) वलवती भवति। भाग्यस्य विधातुर्वा समक्षं किञ्चिदपि बलवन्न भवति। भवितव्यतैव मम बुद्धिं हृतवती, येन त्वया कृता परिहासव्याजेन वञ्चना मया न ज्ञाता, सर्वम् उक्त्वाऽ पि त्वं परिहासव्याजं विधाय मिथ्या कथितवान्। न तव दोषोऽ स्ति , न च मम। भाविनः प्रतिकारो न भवति। भावि प्रबलं भवति।

8. न कदापि सत्पुरुषाः शोकचित्ता भवन्ति। ननु प्रवातेऽ पि निष्कम्पा एव गिरयः।

इदं राजानं प्रति विदूषकस्य वचनम्। राजा शकुन्तला-विरहेण अतिव्याकुलो भवति, रक्षणाय विदूषकं प्रार्थयते। तदा विदूषकस्तं सान्त्वयति- भवान् सत्पुरुषोऽ स्ति। चित्तेऽ धिकं शोकं न कुरु। सतां पुरुषाणां चित्ते कदाचिद् अपि शोको न भवति। प्रवाते (वात्यायाम्) अपि पर्वतेषु कम्पो न भवति। महावाते चलत्यपि गिरयः (पर्वताः) निष्कम्पाः (स्थिरा भवन्ति)। अतः त्वमपि शकुन्तलावियोगरूपेण प्रवातेन व्याकुलो न भव , धैर्यं धारय।

9. मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम्।

अत्र शकुन्तलाया वियोगेन दुःखितो दुष्यन्तो विदूषकं प्रति कथयति- हे मित्र, यदाऽ हं परित्यागेन व्याकुलायाः तव सख्याः शकुन्तलायाः तां दीनां दशां स्मरामि तदाऽ तीव व्याकुलो भवामि, मन्येऽ हम् असहायो जातः. कश्चिद् अपि शरणं (रक्षको) नास्ति। यदाऽ हं तां निराकृतवान् तदा सा गौतम्यादीन् स्वजनान् अनुगन्तुं प्रवृत्ता। तदानीं तस्य गुरुणा तुल्यः शार्ङ्गरवः ताम् अनुगमनाद् निषिद्धवान्- त्वम्

अत्रैव पतिगृहे तिष्ठ, नाऽस्मान् अनुगच्छ। तदा अशरणा सा मम प्रिया रुदन्ती शकुन्तला मयि अश्रुभिः कलुषितां दृष्टिं निक्षिप्तवती। किन्तु अहम् असहायायाः प्रियायाः कृते तदानीं किमपि न कृतवान्। शकुन्तलाया अस्या दीनदशायाः स्मरणं मां तथा दहति यथा सविषं (विषेण संयुक्तं) शल्यं (शरीरे प्रविश्य त्रुटितं बाणस्य अग्रं) कञ्चन पुरुषं दहति। किं करोमि सम्प्रति मम कश्चिद् अपि त्राता नास्ति, अहम् अशरणो जातः। अत्र शिखरिणी छन्दः, उपमा अलंकारः, विप्रलम्भशृङ्गारो रसश्च वर्तते।

10. संमोहेऽपि विस्मयनीयः खल्वस्य प्रतिबोधः।

इयं मिश्रकेश्या उक्तिरस्ति। यदा विदूषको राजानं पृच्छति यत् सा शकुन्तला केन नीता भवेत्, तदा राजा वदति- सा पतिव्रता वर्तते, कश्चिद् अन्यः पुरुषः तां स्प्रष्टुमपि न शक्नोति, मया कण्वस्य आश्रमे अनसूयाया मुखेन श्रुतवान् यत् शकुन्तलाया माता मेनका विद्यते, मन्ये तया तस्याः सख्या वा शकुन्तला नीता। विरहेण सम्मूढस्य दुष्यन्तस्य वचनम् इदं श्रुत्वा मिश्रकेशी वदति यत् संमोहे (मूढावस्थायाम्) अपि अस्य (दुष्यन्तस्य) प्रतिबोधः (स्मरणं स्मरणस्य शक्तिर्वा) निश्चयेन विस्मयनीयं (आश्चर्यजनकं) वर्तते। दुष्यन्तस्य स्मरणशक्तिः प्रबलाऽस्ति, अत एव मोहावस्थायाम् अपि जातं सर्वं वृत्तान्तं स्मरति।

11. न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं द्रष्टुं पारयतः।

विदूषको राजानं वदति- यदि शकुन्तला मेनकया नीता तदा चिन्ताविशेषस्य अवसरो नास्ति, शकुन्तला मिलिष्यति एव, मेनका शकुन्तलां त्वया मेलयितुम् अवश्यमेव कञ्चन उपायं करिष्यति, यतो हि माता पिता च स्वभर्तुर्वियोगेन दुःखितां स्वपुत्रीं चिरं द्रष्टुं न शक्नुतः, तौ पुत्र्या दुःखेन अतीव दुःखितौ भवतः।

12. मनोरथानामतटप्रपातः।

अत्रोक्तं वचनं निशम्य दीनो राजा दुष्यन्तो विदूषकं प्रति विलपन् वदति- सा शकुन्तला पुनः कदाचिद् अपि न प्राप्स्यते। मन्ये सा स्वप्न आसीत्, स्वप्ने दृष्टं न प्राप्यते, अथवा सा केनापि ऐन्द्रजालिकेन सृष्टा माया (मायया निर्मिता) आसीत्, मायिकं वस्तु यथा पुनर्न अधिगम्यते तथा शकुन्तलाऽपि न अधिगंस्यते, अथवा सा मम भ्रमस्य विषय आसीत्, मरुमरीचौ अनुभूतं जलं न लभ्यते, अथवा सा ममैव खण्डितेन पुण्येन तावत् कालमेव सृष्टा, पुण्ये नष्टे साऽपि नष्टा, पुण्याभावेन पुनर्न मिलिष्यति। स्वप्नादौ अनुभूतं वस्तु इव सा असंनिवृत्त्यै ( पुनर्न आगमनाय) अगच्छत्। तया मेलनस्य मे यावन्तो मनोरथाः सन्ति तावतां मनोरथानाम् अतटप्रपातः (अतटात् तटरहितात् पर्वतादेः उच्चस्थानात् प्रकर्षेण पतनं) वर्तते। यथा अतटात् उच्चस्थानात् प्रपतन्तः प्राणिनोऽतिशयेन आहता व्रणिता मृता वा भवन्ति तथा मम मनोरथाः (शकुन्लाविषयाः सर्वा आशाः) पूर्त्यभावेन निष्फला आहता नष्टा तिरोहिता वा भवन्ति। शकुन्तलां पुनः प्राप्तुं या आशा वर्तते सा कदापि पूर्णा न भविष्यति। अत्र पद्ये ससंदेहः, उत्प्रेक्षा,

काव्यलिङ्गं चालंकाराः। विरहविप्रलम्भः शृङ्गारो रसः। क्वचन **मनोरथा नाम तटप्रपाता** इति पाठः। तस्याऽ पि एतादृश एव आशयः।

13. तव सुचरितमङ्गुलीय....यदङ्गुलीषु।

इह राजा अङ्गुलीयकम् उपालभते- हे अङ्गुलीयक, तव पुण्यं स्वल्पमेव आसीत्। पुण्यं विना तस्याः पतिव्रतायाः अङ्गुलिषु स्थितिर्न संभवति। तेन पुण्येन कञ्चिदेव कालं मम प्रियायाः शकुन्तलायाः तासु अङ्गुलिषु अतिष्ठः, या अङ्गुलयः अरुणैर्नखैः मनोहरा आसन्, पुण्ये नष्टे ततः शीघ्रमेव अपतश्च। प्रियाया अङ्गुलीषु स्वल्पकालिकेन अवस्थानरूपेण फलेन अनुमीयते यत् तव सुचरितं (पुण्यं) कृशं (स्वल्पम्) आसीत्। अतः त्वं शोचनीया जाता। अत्र पुष्पिताग्रा छन्दः।

14. एकैकमत्र दिवसे......समुपैष्यतीति।

अत्र राजा विदूषकं प्रति कथयति यद् यदाऽ हं तपोवनात् प्रस्थितः, तदा मां प्रिया शकुन्तला मां पृष्टवती- कियता कालेन भवान् मां स्मरिष्यति ? तदा इदम् अङ्गुरीयकं तस्या हस्ते निवेशयता मयैवं कथितम्- प्रिये, अस्मिन् अङ्गुरीयके लिखितस्य मम नाम्न एकैकम् अक्षरं गणय, यावद् गणना समाप्ता भविष्यति तावदेव मम अवरोधस्य (शुद्धान्तस्य) जन इहैष्यति त्वां मम समीपं नेष्यति च। किन्तु विस्मरणं जातम्, निर्दयेन मया तथा न कृतम्।

15. अचेतनं नाम गुणं न वीक्षते।

इह राजा आत्मानम् अङ्गुलीयकं चोपालभते-  हे अङ्गुलीयक, त्वं मम प्रियायाः शकुन्तलायाः कोमलां बन्धुरां (मनोहरां) चाऽ ङ्गुलिं प्राप्य शचीतीर्थस्य जले कथम् अपतः? तव कृते तस्या अङ्गुलिरेव सर्वोत्तमं स्थानम् आसीत्। मन्ये त्वया अङ्गुलेर्गुणा न ज्ञाता, त्वं मूर्खम् असि, अत एव तां विहाय जले निम्नस्थानेऽ पतः। अथवा अहं त्वां किम् उपालभे ? त्वं हि अचेतनम् असि, यदि तस्य अङ्गुलेर्गुणान् न अवागच्छः तदा तथा अनौचित्यं नास्ति। अहमेव उपालम्भस्य पात्रम् अस्मि, आत्मानं चेतनं मन्ये। तस्या गुणा मयाऽ पि नैव अनुभूताः। सा सर्वोत्तमा प्रिया मयैव तिरस्कृता। अहम् आत्मानं मृषा चेतनं मन्ये। दुष्यन्तस्य उन्मादोऽ त्र ध्वन्यते।

16. जातः सखे प्रणयवान् मृगतृष्णिकायाम्।

अत्र शकुन्तलायाः चित्रं पश्यन् राजा विदूषकं प्रति वदति- हे सखे (मित्र) विदूषक, सा मम प्रियतमा शकुन्तला मम गेहे आगता, अहं तां साक्षाद् अपश्यम् ,किन्तु तदानीं मूढेन मया सा परित्यक्ता, इदानीं त्वहं मूर्खः तस्याः चित्रे श्रद्धां दधामि, वास्तवीं शकुन्तलां त्यक्त्वा चित्रितां शकुन्तलां बहु मन्ये। यथा कश्चन मूर्खः पिपासितः पुरुषो जलपूर्णां नदीं त्यजति, मरुभूमौ सूर्यकिरणेषु प्रतीयमानं जलं सस्पृहं पश्यति च तथाहम् अपि वास्तवीं शकुन्तलां विहाय चित्रे प्रतीयमानां तां सादरं पश्यामि। यथा मृगस्य

पिपासायाः शमनस्य सामर्थ्यं मरुमरीचौ प्रतीयमाने जले न संभवति तथा चित्रितायां शकुन्तलायां मम। चित्रस्थायां शकुन्तलायां मम प्रणयः (प्रेम) तथा निष्फलः क्लेशदायी च वर्तते यथा पिपासितस्य मृगस्य मरुमरीचौ प्रतीयमाने जले। चित्रे मम प्रणयो मृगस्य मरुमरीचौ प्रणय इव वर्तते- इत्युपमायां पर्यवसानेन निदर्शना अलंकारो विद्यते।

17. त्वां कारयामि कमलोदरबन्धनस्थम्।

अत्र शकुन्तलाया विरहेण उन्मत्तो राजा चित्रे चित्रितं भ्रमरं प्रति कथयति- हे भ्रमर, मम प्रियायाः शकुन्तलाया बिम्बेन सदृशम् अधरं न दश, एष बिम्बसदृशो रक्तवर्णोऽतीव कोमलो वर्तते, अयं करस्पर्शादिना कदाचिद् अपि अपीडितेन अनुपभुक्तेन अभिनवेन कस्यचन बालवृक्षस्य पल्लवेन सदृशो वर्तते, एष मया पूर्वं रतोत्सवेषु सदयं (दयया सह) पीतः। अयं यदि त्वया दश्यते तदाऽहं राजा त्वां कमलस्य उदररूपे कारागारे भंत्स्यामि ( तादृशे कारागारे तव बन्धनं करिष्यामि)। राज्ञा हि निरपराधिनो दुर्बलान् पीडयन्तो जना दण्डनीया एव भवन्ति। इह राज्ञ उन्मादो ध्वन्यते। अत एव स चित्रितां शकुन्तलां चित्रितं भ्रमरं च वास्तवं मन्यमानः तथा प्रलपति।

18. पुनरपि चित्रीकृता कान्ता।

यदा विदूषक उन्मत्तं दुष्यन्तं कथयति यदिदं चित्रं वर्तते, चित्रितं भ्रमरं प्रति तव तथा कथनं समीचीनं नास्ति, तदा स राजा दुष्यन्तो वदति- अहम् आनन्दे आसम्। चित्रितां शकुन्तलां तन्मयेन हृदयेन पश्यन्नहं दर्शनसुखम् अनुभवामि स्म। किन्तु त्वया स्मारितं यदिदं चित्रं वर्तते। अनेन तव स्मारणेन मम कान्ता प्रिया शकुन्तला पुनश्चित्रीकृता (चित्ररूपेणैव साधिता)। एषा पूर्वं चित्रिता आसीत्, मध्ये मम भावनया सत्यभूता जाता, पुनः मूर्खेण त्वया चित्रितैव कृता। मम वास्तवशकुन्तलाया दर्शनेन जातं सुखं विनाशितं त्वया, अहं पुनर्दुःखसागरे निपातितः। चित्रस्यैव चित्रीकरणस्य कथनेन विरोधाभासः, स्मरणं च वर्तते।

19. अहो अन्यसंक्रान्तहृदयोऽपि प्रथमसंभावनां रक्षति।

अत्र मिश्रकेशी राज्ञो दक्षिणनायकत्वं सूचयति। सा वदति यद् यद्यपि अयं राजा अन्यसंक्रान्तहृदयः (अन्यस्यां शकुन्तलायां संक्रान्तं संलग्नं हृदयं यस्य स) वर्तते, अस्य मनसि शकुन्तलायां विद्यते तथापि प्रथमसंभावनां (वसुमत्या राज्याः पूर्वं प्रणयं) रक्षति (स्मरति) एव। शकुन्तलायाम् अनुरक्तः सन्नपि अयं राजा पूर्वस्यां वसुमत्यां राज्याम् अपि अनुरक्तो वर्तते। अनेन राजनि कृतज्ञत्वं प्रतीयते।

20. कष्टं खल्वनपत्यता।

राजा यदा धनवृद्धिनामकस्य वणिजः अनपत्यतां (संतानहीनतां) लेखमाध्यमेन जानाति तदाऽतीव दुःखितो भवति। स वदति यद् अनपत्यता (सन्तान-हीनता) खलु (निश्चयेन) कष्टं (कष्टकारि) भवति। सन्तान-हीनः कदाचनापि सुखं न लभते।

21. वसुन्धरा काल इवोप्तबीजा।

राजा यदा धनवृद्धिनामकस्य वणिजः अनपत्यतां (संतानहीनतां) लेखमाध्यमेन जानाति तदा स्वकीयाम् अपि सन्तानहीनतां स्मरति, विषीदन् वदति यत् सन्तानस्य विच्छेदे मूलपुरुषस्य अवसाने च सति सर्वाः सम्पदोऽन्यं प्रति गच्छन्ति। पुरुवंशश्रियोऽपि सन्ततिहीनस्य मम अन्ते सति परम् एव उपस्थास्यन्ति। पुरुवंशो निर्वंशो भविष्यति। पुना राजा शकुन्तलां स्मरन् वदति यद् मां धिक्। शकुन्तलाया गर्भे मम अपत्यं (संततिः) आसीत्, किन्तु सा मया परित्यक्ता। मम कुलस्य प्रतिष्ठापिका गर्भवती धर्मपत्नी मया तथा त्यक्ता यथा केनचित् मूर्खेण कृषकेण सा भूमिः त्यज्यते या काले उपस्थिते महतो फलस्य दात्री भवति। उप्तं (प्ररोपितं) बीजं यस्यां तया वसुन्धरया (पृथिव्या) शकुन्तलाया उपमया उपमालंकारो वर्तते।

22. धौताश्रुसेकमुदकं पितरः पिबन्ति।

अत्र संततिहीनतया पीड्यमानः शोकेन व्याकुलो राजा विलपति- मयि मृते सति मम पूर्वजा विषण्णा भविष्यन्ति। प्रसूतिविकलेन (संतानहीनेन) मया यदा स्वपूर्वजेभ्यो जलं दीयते तदा तस्मिन् जले पूर्वजानाम् अश्रूणि पतन्ति, यतो मम पितरः (पूर्वजाः) चिन्तयन्ति यद् अस्माद् दुष्यन्तात् परं निवपनानि (पिण्ड-तर्पणादीनि) यथाश्रुति (वेदोक्तविधिना) नः (अस्माकं) कृते कः करिष्यति? एवं मयि जीवत्यपि मम पितरो दुःखिता एव सन्ति। मया दत्ते तर्पणजले तेषाम् अश्रूण्यपि मिलितानि भवन्ति। एवं सम्प्रत्यपि मम पितरः स्वाश्रुभिः सिक्तमेव (मिश्रितमेव) मया दत्तं तर्पणजलं पिबन्ति।

23. मय्यस्तमितमनार्ये देश इव सरस्वतीस्रोतः।

संतानहीनो दुष्यन्तोऽत्र वदति- मम पौरवं कुलं मूलत एव पवित्रं वर्तते। इदं प्रजाबन्ध्यस्य (संतानहीनस्य) अनार्यस्य (पापिनः) मम अन्ते सति तथैव अस्तं गमिष्यति यथा अनार्ये (म्लेच्छ-सेविते) देशे सरस्वतीस्रोतः (सरस्वत्या नद्याः प्रवाहः) अस्तं गता। सरस्वती नदी यत्र विलुप्ता स देशोऽनार्यः (म्लेच्छबहुलः) विनशनम् इति नाम्ना पुराणे प्रसिद्धं वर्तते। सरस्वती-स्रोतसा स्वकुलस्योपमया उपमालंकारः।

24. अथवा बहुप्रत्यवायं नृपत्वम्।

यदा कञ्चुकी सूयचति यत् केनचिद् अदृश्येन सत्त्वेन (राक्षस-पिशाचादिना) विदूषको मेघप्रतिच्छन्ने प्रासादे गृहीतः, तदा राजा क्रुध्यन् विचारयति यन्मम गृहा राक्षसादिभिः अभिभवितुं न शक्यन्ते, यतो हि

पापिनाम् अशुद्धानां दुराचारिणाम् एव गृहाः तैरभिभवितुं शक्यन्ते। पुना राजा तर्कं करोति यद् मम राज्ञो गृहा राक्षसादिना अभिभवितुं शक्यन्ते, यतो हि नृपत्वं (राजत्वं) बहुप्रत्यवायं (बहवः प्रत्यवाया दुराचरणजन्या राक्षसादिना उपद्रवरूपा विघ्ना यस्मिन् तद् बहुविघ्नं) भवति। राज्ञि स्वप्रमादेन प्रतिदिनं क्रियमाणं प्रजासु च प्रमादेन बुद्धिपूर्वकं वा क्रियमाणं दुराचरणं संभवति। प्रजानामपि दुराचरणस्य फलं राजा भुङ्क्ते। न जाने अहम् एव प्रतिदिनं प्रमादेन किं किं स्खलितं करोमि- इति ज्ञातुं न शक्यते। प्रजासु कः सन्मार्गेण कुमार्गेण वा गच्छति- इत्यस्य निश्चयस्तु अतीव दुष्करो वर्तते।

25. मार्जारगृहीत उन्दुरुरिव निराशोऽस्मि जीविते।

अत्र अदृश्येन मातलिना गृहीतो विदूषको राजानं प्रति वदति यद् अहं स्वजीविते (प्राणेषु) तथा निराशो जातोऽस्मि, यथा मार्जारेण (विडालेन) गृहीत उन्दुरुः (मूषिकः) भवति। यथा विडालेन गृहीतो मूषिको जीवनस्य आशां त्यजति तथा अनेन गृहीतः अहम् अपि जीवनस्य आशां त्यजामि।

26. हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।

अत्र प्रच्छन्नं मातलिं प्रति राजा वदति यद् अहं तव हननाय तं बाणं संदधे (चालयामि) यो बाणो वध्यं (हन्तव्यं) त्वां हनिष्यति, रक्ष्यं (रक्षणीयं) द्विजं (ब्राह्मणं) विदूषकं रक्षयिष्यति च। मम बाणो हंस इव वर्तते। यथा हंसो क्षीरेण (दुग्धेन) मिश्रिताद् जलात् क्षीरं (दुग्धं) गृह्णाति जलम् (अपः) त्यजति च तथा मम बाणः क्षीरसदृशं त्वां ग्रहीष्यति (हनिष्यति), जलसदृशं विदूषकं त्यक्ष्यति (रक्षिष्यति) च । अत्र हंसो दुष्यन्तबाणस्य दृष्टान्तरूपेण प्रस्तुतः। अतो दृष्टान्तालंकारोऽस्ति।

27. प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः।

अत्रेन्द्रस्य सारथिर्मातलिर्बाणं मोक्तुकामं राजानं प्रति कथयति- हे राजन्, तव शरव्या (वध्याः) असुराः सन्ति, अतः तेषु असुरेषु इदं धनुर्विकृष्यताम्, तेषु बाणोऽयं त्वया मुच्यताम्, न तु मयि। अहं तव मित्रस्य इन्द्रस्य सारथिर्मातलिरस्मि, अतः तवापि मित्रम् अस्मि, सुहृज्जने (मित्रे) सज्जनानां कठोरा बाणा न पतन्ति, अपितु प्रसादेन (प्रसन्नतया ) सौम्यानि (सुन्दराणि) चक्षूंषि (नेत्राणि) पतन्ति। सज्जनः स्वमित्रं स्निग्धेन चक्षुषा पश्यति, न तु क्रूरेण, शरेण न हन्तीति भावो वर्तते।

28. उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तं नैशं तिमिरमपाकरोति चन्द्रः।

अत्र मातली राजानं प्रति वदति- राजन्, कालनेमिनामकस्य दानवस्य सन्ततिर्दुर्जयनामको दावनगणो वर्तते। स तव मित्रेण शतक्रतुना (इन्द्रेण) हन्तुं न शक्यते। त्वमेव रणशिरसि (युद्धस्य अग्रे) तस्य हन्ता स्मृतः। अतस्तं दानवगणं जहि। सर्वं कार्यं केनचिद् एकेन कर्तुं न शक्यते। सप्तसप्तिः (सूर्यः) यं नैशं (निशायां विद्यमानं) तिमिरम् (अन्धकारं) नाशयितुं न शक्नोति तं चन्द्र एव अपाकरोति (दूरीकरोति)। एवं सूर्यसदृशः सन्तापकः तेजस्वी अपि इन्द्रः तं दानवगणं हन्तुं न प्रभवति, किन्तु चन्द्रसदृश आह्लादकः

त्वमेव दुर्जयं दानवगणं हन्तुं समर्थः। आह्लादकत्वेन त्वम् इन्द्राद् अपि अधिक इति ध्वन्यते। दृष्टान्तोऽ लंकारो वर्तते।

29. तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः।

दुष्यन्तो यदा मातलिं कथयति यद् यदा मित्रस्य इन्द्रस्य साहाय्यं मया विधेयम्, तदा त्वया विदूषकः किमर्थं पीडितः। दुष्यन्तस्य वचनमिदं श्रुत्वा मातलिर्वदति यद् भवान् मया शकुन्तलाया विरहेण व्याकुलो दृष्टः, अतो भवन्तं कोपयितुं मया विदूषकस्तथा पीडितः। भवतः प्रकृतिः पराक्रमो वर्तते। त्वां प्रकृत्या सम्पन्नं विधातुं मया तथा कृतम्। यदा वह्निः निर्वाणोन्मुखो भवति तदा तत्र निक्षिप्तम् इन्धनं चाल्यते, तेन बह्निः ज्वलितो भवति। शान्तः पन्नगः (सर्पः) यदा केनचिद् विप्रक्रियते ( लगुडादिना उद्वेजितो भवति) तदा क्रुद्धो भवति फणां कुरुते च। एवं तेजस्वी यदा केनचित् क्षोभितो भवति तदा स्वप्रकृतिं तेजः (पराक्रमं) प्रतिपद्यते (प्राप्नोति)। भवान् तेजस्वी वर्तते। मया विदूषकपीडनेन उद्वेजितो भवान् स्वं तेजः प्राप्तवान्, युद्धस्य योग्यता समायता। अन्यथा खिन्नो भवान् योद्धुम् अर्हो नाऽ भविष्यः।

30. षष्ठाङ्कस्य सारांशं लिखत।

31. दुष्यन्तस्य विरहं वर्णयत।

**सप्तमोऽ ङ्कः**

सप्तमाङ्के दुष्यन्तस्य शकुन्तलया स्वपुत्रेण सर्वदमनेन च मारीचस्याश्रमे मेलनं मुख्यरूपेण वर्णितम्। दुष्यन्तो दुर्जयनामकं दानवगणं हन्ति, इन्द्रेण सत्कृतो भवति, मातलिना रथेन स्वर्गात् क्रमेण मारीचस्याश्रमं प्रति नीयते, मारीचाश्रमे सर्वदमनेन शकुन्तलया संगच्छते च।

1. सिद्ध्यन्ति कर्मसु....... धुरि नाकरिष्यत्।

अत्र राजा मातलिं प्रति वदति- मम दुर्जयदानवगणस्योपरि विजयस्य प्रधानं कारणं शतक्रतोः (इन्द्रस्य) एव प्रसादो वर्तते। यदि स मां तस्य दानवगणस्य हननाय अग्रे नाऽ करिष्यत् तदा तद्विजयस्य भाजनम् अहं नाऽ भविष्यम्। नियोज्यानां (सेवकानां) महत्स्वपि कार्येषु या सिद्धिर्भवति तस्या मुख्यं कारणं तान् प्रति ईश्वराणां (प्रभूणां) संभावनायाः (बहुमानस्य) एव गुणो भवति। सेवकाः महत्स्वपि कार्येषु स्वामिनां कृपयैव सिद्धा भवन्ति। अत्र दृष्टान्तः सूर्यस्य सारथिः अरुण एव वर्तते। यदि भगवान् सहस्रकिरणः (सूर्यः) स्वसारथिम् अरुणं स्वरथस्य धुरि (अग्रे) न अस्थापयिष्यत् तदाऽ रुणः तमसाम् (अन्धकाराणां) विनाशे समर्थो नाऽ भविष्यत्। ऊरुरहितः, असहायश्च अरुणो यत् तमो हन्ति तत्र प्रधानं कारणं भगवतः सूर्यस्यैव कृपा वर्तते। भगवता सूर्येण स्वरथे अरुणस्य नियोजनं महती कृपा वर्तते। एवं मम विजये प्रधानं कारणं भगवत इन्द्रस्यैव कृपाऽ स्ति। अत्र पद्येऽ प्रस्तुतप्रशंसा दृष्टान्तश्च अलंकारो वर्तते।

2. त्रिस्रोतसं वहति......विक्रमपूत एषः।

स्वर्गाद् अवतरन् राजा यदा पृच्छति यद् इदानीं वयं कस्मिन् प्रदेशे आगताः, तदा मातलिस्तं प्रति वदति- वयं सम्प्रति धूलिरहितस्य प्रवहनामकस्य वायोः पथि वर्तावहे। अयं प्रवहनामको वायुः आकाशे स्थितां त्रिस्रोतसं ( (त्रीणि आकाशे पृथिव्यां पाताले च विद्यमानानि स्रोतांसि प्रवाहा यस्याः तां गङ्गां) धारयति, (अयमेव आकाशगङ्गां धारयति), ज्योतिषां चक्रेण (समूहेन) यस्य रशमयो विभक्ताः सन्ति स एवाऽ यं प्रवहवातो ग्रहनक्षत्रादीनि चालयति (गतिमन्ति) करोति, अत्रैव भगवता वामनेन स्वकीयो द्वितीयः चरणो न्यस्तः, अत एवाऽ यं द्वितीयहरिविक्रमपूतः (द्वितीयेन हरेः भगवतो विष्णोः अवतारस्य वामनस्य विक्रमेण चरणन्यासेन पवित्रो) वर्तते। आकाशगङ्गाया धारणं ग्रह-नक्षत्रसंचालनं वामनेन चरणस्य न्यासेन पवित्रता च- एतत् सर्वं प्रवहवातस्य वैशिष्ट्यं वर्तते।

3. अहो उदाररमणीया पृथिवी।

अत्र मातलिर्दुष्यन्तं प्रति पृथिवीं प्रशंसन् कथयति- एषा पृथिवी उदारा (महती वदान्या) वर्तते, अस्या भवादृश्यः संततयः स्वर्गमपि विपदो रक्षन्ति, एवं रमणीया (प्रकृत्या वदान्यतया) च मनोहरा लोकोत्तरस्य आनन्दस्य जनिका वर्तते।

4. अनतिक्रमणीयानि श्रेयांसि।

अत्र मातलिं प्रति राज्ञ उक्तिः। यदा मातलिर्वदति यदयं हेमकूटनाम किंपुरुषपर्वतो वर्तते, अयं तपस्विनाम् उत्कृष्टं क्षेत्रं विद्यते, इह सुराणाम् असुराणां च गुरुः (पिता) स मारीच ऋषिः तपः करोति, यो ब्रह्मणः पौत्रो मरीचेः पुत्रश्चास्ति, अत एवायं मारीच उच्यते, यस्याऽ परं नाम कश्यपोऽ पि भवति, तदा राजा वदति यद् इदं स्थानं भगवान् मारीचश्च श्रेयसां (मङ्गलानां) मूलकारणं विद्यते। एतेषां श्रेयःस्वरूपाणाम् अतिक्रमणम् (अवहेलनम् आकाशेन गमनाद् उल्लङ्घनं वा) न कर्तव्यम्। श्रेयांसि (मङ्गलानि) अतिक्रमणीयानि (उल्लङ्घनीयानि) न भवन्ति। अतो भगवन्तं प्रदक्षिणीकृत्यैव गन्तुम् इच्छामि।

5. अहो स्वर्गादिदमधिकतरं निर्वृतिस्थानम्।

अत्र राजा प्रजापतेः मारीचस्य आश्रमं प्रविश्य तस्य आश्रमस्य विषये कथयतिः- इदं प्रजापतेः क्षेत्रं स्वर्गाद् अपि अधिकतरायाः निर्वृतेः (आनन्दस्य) स्थानं वर्तते। इह स्वर्गाद् अपि महत्तर आनन्दोऽ नुभूयते। मन्येऽ हम् अमृतसरसि निमग्नो भवामि।

6. उत्सर्पिणी खलु महतां प्रार्थना।

अत्र राजानं प्रति मातलेरुक्तिः। राजा पूर्वं मारीचाश्रमस्य माहात्म्यं वर्णयति- अत्र कल्पवृक्षाः सन्ति, किन्तु मुनयस्तेभ्यः किमपि भोजनार्थं न याचन्ते, वातं पीत्वा जीवन्ति, स्वर्णकमलानां परागेण पीतवर्णे जले पुण्याभिषेकं कुर्वन्ति, न तु जलक्रीडां कुर्वन्ति, अप्सरसां सन्निधौ अपि रत्नमयशिलासु स्थिताः

सन्तः तपः कुर्वन्ति। साधारणा जना यत् कल्पवृक्षादि प्राप्तुं तप आचरन्ति, तस्मादेव एते मुनयो विरक्ताः सन्ति। इमे आत्मालाभाय तपसि रताः। राज्ञ इदं वचनं श्रुत्वा मातलिर्वदति यद् महताम् (एतादृशानां महात्मनां) प्रार्थना (याच्ञा इच्छा वा) उत्पसर्पिणी (ऊर्द्ध्वगामिनी) भवति। महान्त उत्तरोत्तरम् उत्कृष्टं वस्तु कामयन्ते। एभिः स्वर्गसदृशस्ततोऽ पि अधिके वा आनन्दो लब्ध एव, इतोऽ प्यधिकं परमानन्दं प्राप्तुम् एते तपस्यन्ति।

7. पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते।

यदा राजा मातलेः कथनेन अशोकवृक्षस्यच्छायायाम् उपविशति मातलिर्मारीचं राज्ञ आगमनं निवेदयितुं गच्छति च तदा तस्य दक्षिणस्य बाहोः शुभस्य सूचकं स्पन्दनं भवति। तदा राजा विचारयन् स्वदक्षिणं बाहुं प्रति कथयति- हे बाहो, तव स्पन्दनं वृथा वर्तते, स्पन्दनस्य फलं स्त्रीलाभोऽ स्ति, अत्र शकुन्तलाया लाभस्य संभावना नास्ति। पूर्वमेव मया शकुन्तलारूपं श्रेयः (कल्याणं) अवधीरितम् (परित्यक्तम्)। तत् परित्यक्तं श्रेय इदानीं दुःखाय एव परिणतम्।

8. अभूमिरियमविनयस्य।

अत्र राजा तदा वदति यदा प्रथमायाः तापस्या वचनेन सर्वदमनस्य चपलताम् अवगच्छति। स वदति यद् इयं तपोभूमिः अविनयस्य (अशिष्टाचारस्य) अभूमिः (स्थानं न) अस्ति। इह कश्चनापि अविनयं न कर्तुं प्रभवति, किन्तु न जाने क एवम् अशिष्टम् आचरति।

9. किं नोऽ पत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि।

प्रथमा तापसी सिहं पीडयन्तं सर्दमनं प्रति कथयति- अरे अविनीत सर्वदमन, सत्त्वानि (सिंहादयः प्राणिनः) नः (अस्माकम्) अपत्येन (संतानेन) निर्विशेषाणि (समानि तुल्यानि) सन्ति, एतान् केन हेतुना विप्रकरोषि (उत्पीडयसि), एतान् न पीडय, सिहशावकं मुञ्चेति भावः।

10. महतस्तेजसो बीजं...इव स्थितः।

अत्र स्वकीयम् अधरं दर्शयित्वा तापसीम् उपहसन्तं सर्वदमनं विलोक्य राजा वदति- अयं बालः (सर्वदमनः) कस्यचित् महतः तेजसः (पराक्रमस्य) बीजम् (उपादानं कारणं) प्रतीयते, अत एव बाल्यावस्थयैव तेजोरूपोऽ स्ति, तापसीमपि न गणयति। यथा एधोऽ पेक्षः (इन्धनमात्रम् अपेक्षमाणः) वह्निः स्फुलिङ्गावस्थया (स्फुलिङ्गस्य कणस्य दशया) महतः तेजसः(वह्नेः) कारणं भवति तथा अयं बालोऽ पि वर्तते। उपमाऽ लंकारो विद्यते।

11. सत्त्वसंश्रयगुणोऽ पि दूष्यते कृषणसर्पशिशुनेव चन्दनः।

अयं श्लोको राज्ञा सिंहशिशुम् अमुञ्चन्तं सर्वदमनं प्रति कथ्यते। अत्र राजा एवं वदति- हे कस्यचन महर्षेः पुत्र, त्वं निरपराधिनं सिंहशिशुं न पीडय, इदं सिंहशिशोः पीडनम् आश्रमविरुद्धं वर्तते। आश्रमविरुद्धम् आचरन् त्वं सात्विकं पितरं तथैव दूषयसि यथा कृष्णसर्पस्य शिशुः सुगन्धादिना सुखस्य जनकं सत्त्वगुणयुक्तं चन्दनं विषादिना दूषयति। उपमा अलंकारः।

12. हन्त द्वितीयमिदमाशाजननम्।

यदा तापसी कथयति यद् अस्य पुरुवंशजस्य सर्वदमनस्य जननी मारीचस्य इह एव तपोवने वसति, तदा राजा वदति यद् अस्य बालकस्य जनन्या अत्र निवासः शकुन्तला-प्राप्तेः द्वितीयाम् आशां जनयति, प्रथमा साऽऽ शा तु बालस्य वंशस्य श्रवणेन जाता।

13. कस्तस्य धर्मदारत्यागिनो नाम कीर्तयिष्यति।

यदा राजा तापसीं पृच्छति यद् अस्य बालस्य जननी कस्य राजर्षेः पत्नी वर्तते, तदा तापसी वदति यत् पापिनो नाम न ग्राह्यम्, स राजर्षिः स्वधर्मदारान् (धर्मेण परिणीतां स्त्रियं पत्नीं) परित्यक्तवान्। पत्न्याः परित्यागो महत् पापम्। अतस्तस्य नाम न कथयिष्यामि।

14. अनार्यः खलु परदारव्यवहारः।

इदं राज्ञो दुष्यन्तस्य वचनम्। यदा राजा तापसीमुखाद् वेत्ति यद् अस्य बालस्य माता अप्सरा वर्तते तदा तन्मातुर्विषये प्रष्टुम् इच्छति, किन्तु तदानीमेव विचार आयाति यदस्य माता परस्त्री भवितुम् अर्हति, अतः परदारव्यवहारः (परस्त्रीविषये प्रश्नो जिज्ञासा) वा अनार्यः (महताम् आचारेण विरुद्धो) वर्तते। महापुरुषैः परस्त्रीविषये निष्प्रयोजना जिज्ञासा न कर्तव्या।

15. सर्वदमन प्रेक्षस्व शकुन्तलावण्यम्।

यदा सर्वदमनः सिंहशिशुं न मुञ्चति तदा तापसी तस्मै मृण्मयमयूररूपम् अन्यत् क्रीडनकं ददाति वदति च- हे सर्वदमन, शकुन्तस्य (मयूररूपस्य अस्य पक्षिणः) लावण्यं (सौन्दर्यं) प्रेक्षस्व (पश्य)। शकुन्तलावण्यशब्दे शकुन्तलाशब्दो वर्तते, अनेन शकुन्लायाः स्मरणं भवति, येन सर्वदमनोऽग्रे पृच्छति यद् मम माता कुत्र वर्तते। तापसी वदति यद् भवान् नामसाम्येन वञ्चितः, लावण्यशब्दस्य लाशब्दं शकुन्तशब्देन संयोज्य शकुन्तलारूपोऽर्थः कृतः। इदं सर्वं शृण्वन् राजा निश्चिनोति यद् अस्य बालस्य माता शकुन्तला वर्तते। एवं शब्दोऽयं शकुन्तलाया अभिज्ञाने साहाय्यं करोति।

16. मम दीर्घं व्रतं बिभर्ति।

अत्र राजा शकुन्तलां विलोक्य दुःखं हर्षं च अनुभवन् वदति- सा पूर्वं कण्वाश्रमे विलोकिता या सा इयं सम्प्रति विलोक्यमाना च शकुन्तला मलिने वस्त्रे धारयति, नियमेन (तपस्यया) अस्या मुखं क्षीणं वर्तते,

एकामेव वेणीं धारयति, अस्याः शीलं (चरित्रं) शुद्धं वर्तते, एषा मां न त्यक्तवती, अहं निष्करुणोऽस्मि, मम निर्दयस्यापि कृते एषा दीर्घं विरहव्रतं बिभर्ति (धारयति)। अस्या विरह-दशाया विलोकनेन दुःखं भवति, शुद्धस्य चारित्र्यस्य ज्ञानेन तु सुखं भवति। एवम् इदानीं मयि हर्ष-विषादयोः सन्धिः अनुभूयते। एवमिह भावसन्धिर्वर्तते।

17. उपरागान्ते शशिनः समुपागता रोहिणी योगम्।

अत्र राजा शकुन्तलां प्रति कथयति- हे शकुन्तले, अङ्गुरीयकस्य दर्शनेन मया पूर्वं तव स्मृतिः प्राप्ता, तया मम मोहरूपं (तव विस्मरणरूपं) तमो नष्टम्। इदानीं मम सौभाग्येन मम पुरः त्वं स्थिताऽसि। यथा उपरागान्ते (उपरागस्य राहुणा ग्रहणस्य अन्ते) रोहिणी चन्द्रेण संगता भवति तथा मोहस्य (विस्मरणस्य) अन्ते भवती मया संगता। मोहरहितेन मया तव मेलनं राहुमुक्तेन चन्द्रेण रोहिण्याः (रोहिणी-नक्षत्रस्य) मेलनम् इव वर्तते- इति उपमायां पर्यसानेन निदर्शनाऽलंकारो वर्तते।

18. स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया।

अत्र राजा शकुन्तलां प्रति कथयति- प्रिये शकुन्तले, मया पूर्वं यस्तव प्रत्यादेशः (परित्यागः) कृतः, तेन जन्यं तव व्यलीकं (दुःखम्) तव हृदयात् अपैतु (दूरीभवतु)। यदा भवती मम गृहान् पूर्वम् आगता तदा मम मनसि कश्चन सम्मोहः (तव विस्मृतिः) आसीत्। अत एव भवती परित्यक्ता। येषां हृदि तमः (मोहः) प्रबलं भवति तेषां शुभविषयेऽपि वृत्तयः (व्यवहाराः) एवंविधाः (भवादृशधर्मपत्नी- त्यागरूपा) एव भवन्ति। यथा कश्चन अन्धः शिरसि केनचित् क्षिप्ताम् (न्यस्ताम्) स्रजं (मालाम्) अपि अहिशंकया (सर्पस्य संदेहेन) स्वशिरसः अपनयति तथा तदानीं मोहान्धोऽहं पतिव्रतां मम कुलस्य प्रतिष्ठां भवतीं त्यक्तवान्। मयैतद् अज्ञानात् कृतम्। अत्र पद्ये अर्थान्तरन्यासो दृष्टान्तश्च अलंकारः।

19. तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लता कुसुमम्।

अत्र शकुन्तलायै अङ्गुरीयकं प्रयच्छन् राजा वदति- यस्मात् कारणाद् इदम् अङ्गुरीयकं पूर्वं (हस्तिनापुरे राजधान्यां त्यागस्य समये) भवत्याः कृते दुर्लभम् आसीत् तस्मात् कारणात् सम्प्रति मया सह संगमे भवती इदं तथा स्वीकरोतु यथा लता ऋतुसमागमचिह्नं (वसन्त-ऋतोः समागसस्य चिह्नं) कुसुमं (पुष्पं) प्रतिपद्यते (प्राप्नोति धारयति वा)। यथा वसन्तेन पुनः संगता लता पुष्पं पुनर्धारयति तथा मया पुनः संगता भवती इदम् अङ्गुरीयकं धारयतु। ऋतुना दुष्यन्तस्य, लतया शकुन्तलायाः, कुसुमेन अङ्गुरीयकस्य च निगरणं वर्तते। तेन साध्यवसाना लक्षणा अतिशयोक्तिरलंकारश्च वर्तते।

20. किमीश्वराणां परोक्षम्।

अत्र राजानं प्रति मातलिर्वदति। यदा राजा पृच्छति यद् अयं शकुन्तलया सह जायमानः समागमः पूर्वतनो वृत्तान्तश्च इन्द्रेण ज्ञातो न वेति, तदा मातलिर्वदति यद् इन्द्र ईश्वरः (ऐश्वर्यवान्) वर्तते, तस्य कृते

किमपि परोक्षं नास्ति, स सर्वं ज्ञातवान्। ईश्वराणां (तादृशानाम् ऐश्वर्यशालिनां) कृते किमपि परोक्षं न भवति, अपितु सर्वं प्रत्यक्षम् एव भवति, तादृशाः सर्वज्ञा भवन्ति। सामान्येन विशेषस्य इन्द्रस्य व्यक्त्या अप्रस्तुतप्रशंसा अलंकारो वर्तते।

21. संभावनीयप्रभावा अस्याकृतिः।

यदा मारीचो वदति यद् अयं राजा तव पुत्रस्य इन्द्रस्य दानवेन सह जायमाने युद्धे अग्रे भवति विजयं लभते च , तदा देवमाता अदिती राजानं विलोक्य तस्य विषये वदति यद् अस्य (राज्ञः) आकृतिः (आकारः) सम्भावनीयप्रभावा (संभावनीया दर्शनमात्रेण ज्ञानीयाः दुर्जयदैत्यदानवगणस्य विजयादयः प्रभावाः पराक्रमादयो यस्याः सा) वर्तते। अस्याकार एवास्य प्रभावान् प्रकटयति।

22. श्रद्धा वित्तं विधिश्चेति त्रितयं यत् समागतम्।

अत्र मारीचः शकुन्तलां सर्वदमनं राजानं च प्रत्येकं निर्दिशन् वदति- इयं शकुन्तला परित्यागे सत्यपि दिष्ट्या (सौभाग्येन) साध्वी (सच्चरित्रा) एव स्थिता, अनया तादृक् किमपि न कृतं येनाऽस्याः चारित्र्योपरि कश्चन प्रश्नं कुर्यात्, इदं सर्वदमनरूपम् अपत्यं (सन्ततिः) दिष्ट्या सत् (जन्म-संस्कारादिना शुद्धं) वर्तते, भवान् (राजा दुष्यन्तोऽपि) तेन तेन पराक्रमादिना गुणेन चारित्र्येण च सम्पन्नो वर्तते। मन्ये शकुन्तला श्रद्धायाः (आस्तिक्यबुद्धेः), सर्वदमनो वित्तस्य (धनस्य), भवान् (राजा) च विधेः (वेदादिना बोधितस्य यागादेः) मूर्तिरस्ति। अद्य मम नेत्रयोः पुरः श्रद्धा वित्तं विधिश्च एकत्र संगतं वर्तते। एतादृशः संयोगो विरल एव भवति। यत्र श्रद्धा भवति ,तत्र वित्तं विधिर्वा न भवति, यत्र वित्तं भवति तत्र श्रद्धा विधिर्वा न भवति, यत्र विधिर्भवति तत्र श्रद्धा वित्तं वा न भवति। अद्य त्रयाणां दुर्लभः संयोगो जातः। त्रयाणां योग्यानां संबन्धस्य वर्णनेन समाऽलंकारो वर्तते।

23. तव प्रसादस्य पुरस्तु सम्पदः।

मारीचस्य दर्शनात् प्रागेव राजा पुत्रेण सर्वदमनेन पत्न्या शकुन्तलया च संगतः। राजा यदा मारीचं पश्यति तदा तस्य माहात्म्यं प्रकटयन् वदति- भगवन्, भवतो दर्शनात् प्रागेव अभिप्रेतस्य (इष्टस्य सर्वदमनस्य शकुन्तलायाश्च समागमस्य) सिद्धिरभवत्, पश्चाद् भवतो दर्शनं जातम्। अभिप्रेतस्य सिद्धिः कार्यं भवति, कारणं तु भवतो दर्शनम्। कारणं पूर्वं भवति, कार्यं तु पश्चाद् भवति। पूर्वं कसुमं भवति, ततो वृक्षादौ फलं भवति, पूर्वं घनानाम् (मेघानाम्) उदयो भवति, ततो जलं (वृष्टिः) भवति। एवं निमित्तस्य (कारणस्य) नैमित्तिकस्य (कार्यस्य) च अयमेव पौर्वापर्यरूपः क्रमः प्रसिद्धो वर्तते, किन्तु भवतः समक्षं क्रम एष विपरीतो भवति। तव (भवतो मारीचस्य) प्रसादस्य (प्रसन्नतायाः) पुरः (पूर्वम्) एव सम्पदः (धन-पुत्र-दारादयः) सिद्ध्यन्ति। भवतो दर्शनात् प्रागेव अहम् इष्टेन संगतः। अत्रैकस्या एवोदयक्रियायाः कुसुमेन, पयसा, सम्पद्भिश्च अन्वयेन क्रियादीपकम्, कुसम-पयसोः दृष्टान्तीकरणेन दृष्टान्तश्च अलंकारः।

24. यथा गजे साधु समक्षरूपे.......मे मनसो विकारः।

अत्र राजा मारीचं प्रति पृच्छति- यदा गान्धर्वविधिना मया परिणीता शकुन्तला मम समक्षम् आगता तदा संशयेन तस्याः पूर्णं स्मरणं न जातम्, किन्तु यदा अङ्गुरीयकं विलोकितं तदाऽ स्याः तथा स्मरणं जातम्। इदं तथैवाऽ स्ति यथा कश्चित् समक्षम् उपस्थितं गजं विलोक्य 'अयं गजोऽ स्ति वा न वा' इति संशयं करोति, गजे गते तस्य गजस्य पदचिह्नानि विलोक्य 'स गज आसीत्' इति निश्चयं करोति च, तथैव मम दशा वर्तते। यदाऽ हं शकुन्तलां विलोकितवान् तदा 'इयं मया परिणीता वा न वा' इति संशयो जातः, यदा शकुन्तला नीता तदा अङ्गुरीयकं विलोक्य 'सा मया परिणीता' इति निश्चयो जातः। अङ्गुरीयकस्य विलोकनेनाऽ स्याः परिणयस्य निर्णयः पदचिह्नदर्शनेन गजस्य निर्णय इव अयुक्तो वर्तते। अत्र किं कारणमिति भगवता प्रतिपादनीयम्।

25. छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा।

अत्र मारीचः शकुन्तलां प्रति कथयति यत् त्वया भर्तारं राजानं प्रति रोषो न कर्तव्यः। अस्य राज्ञः स्मृतिर्दुर्वाससः शापेन लुप्ताऽ भवत्, अत एव त्वां स न स्मृतवान्। त्वां प्रति स रुक्षः (स्नेह-हीनो) जातः। यथा मलेन आवृते दर्पणे कस्यचिद् अपि छाया (प्रतिबिम्बं) न भवति तथा शापेन दूषितायाम् अस्य बुद्धौ त्वं न स्मृता। अङ्गुरीयकस्य दर्शनेन शापस्य अवसानं जातम्। इदानीं राज्ञो बुद्धिर्मलरहितदर्पणवद् विशुद्धा वर्तते। अतस्त्वं स्मृता। तव स्मरणस्य कारणं दुर्वाससः शाप एव, अयं तु निरपराध एव। अत्र पद्ये दृष्टान्तोऽ लंकारः।

26. प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती न हीयताम्।

इदं भरतवाक्यं वर्तते। अत्र राजा मारीचं प्रति प्रार्थयते- भवतः कृपया पार्थिवः (राजा) प्रकृतीनां (प्रजानां) हितस्य साधने प्रवृत्तो भवतु, श्रुत्या (श्रवणेन) महती प्रशस्ता पुरुषार्थानां साधिका सरस्वती (वेदवाणी) लोकैर्न हीयताम् (त्यज्यताम्), सर्वे वेदान् पठन्तु, वेदध्वनिः सर्वत्र प्रसरतु, श्रुत्या (वेदेन वेद-सम्मतस्य सिद्धान्तस्य प्रतिपादनेन) महती (प्रशस्ता), श्रुत्या ( सुमधुरवर्णानां श्रवणेन) महती (वीणारूपा) सुमधुरा सरस्वती (काव्यरूपा कवीनां वाणी) लोकैर्न हीयताम् (त्यज्यताम्), वेदसम्मतानां सतां मधुराणां काव्यानां प्रचारो भवतु। अथवा **पाठान्तरे** श्रुतिमहतां (श्रुत्या वेदेन वेदस्य ज्ञानेन प्रचारेण च महतां महापुरुषाणां) सरस्वती (वेदमयी वेदसम्मता च वाणी) महीयताम् (पूज्या भवतु, सम्मानं लभताम्)- इत्यर्थः। परिगतशक्तिः ( परिगता व्यापिका शक्तिर्यस्य स सर्वशक्तिमान्) आत्मभूः (स्वयम्भूः) नीललोहितः (शिवः) मम अपि (दुष्यन्तस्य अपि, कवेरपि अन्यस्य अपि) पुनर्भवं (पुनर्जन्म) क्षपयतु (विनाशयतु), मोक्षं ददातु।

27. मातलि-दुष्यन्तयोः संवादं स्वसंस्कृतगिरा वर्णयत।

28. मारीच-दुष्यन्तसंवादस्य वैशिष्ट्यं बोधयत।

29. सप्तमाङ्कस्य वैशिष्ट्यं प्रतिपादयत।